॥ओ३म्॥

# पतंजलि विश्वविद्यालय, हरिद्वार

## मुख्य परीक्षा - मार्च 2021

कक्षा - बी०ए० व्याकरण | पूर्णांक - 70

विषय - संस्कृतसाहित्यम् | पेपर कोड - BV-503

सेमे० - 03 | समय -3 घंटे

* अवधेयम् - प्रश्नपत्रमिदं 'क' 'ख' 'ग' इति खण्डत्रये विभक्तमस्ति। प्रतिखण्डं अङ्कनिर्धारणं तत्रैव द्रष्टुं शक्यते। प्रतिखण्डं प्रदत्तनिर्देशानुसारेण प्रश्नानामुत्तराणि लेखनीयानि। सर्वे प्रश्ना अनिवार्याः।

### खण्ड - 'क' (गद्यम्)

**प्रश्नः - 1**. अधोलिखितेषु गद्येषु द्वयोः सप्रसङ्गं व्याख्या कार्या। (10x2=20)

अथ सोऽप्याचचक्षे- 'देव! मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः। स च त्रासगद्गमगदत् महाभाग! क्लिष्टस्य मे क्रियतामार्य! साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः । तमलमस्मि नाहमुद्धर्तुम्' इति।

पुनरिमे ब्रुवते - ननु चतस्रो राजविद्याः, त्रयी वार्तान्वीक्षिकी दण्डनीतिरिति । तासु तिस्रस्त्रयीवार्त्तान्वीक्षिक्यो महत्यो मन्दफलाश्च। तास्तावदासताम्। अधीष्व तावद्दण्डनीतिम्। इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थ षड्भिः श्लोकसहस्रैः संक्षिप्ता। सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा इति। स तथा इत्यधीते शृणोति च। तत्रैव जरां गच्छति।

तथा हि - न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति, न विलोभनवस्तूनि प्रेषयति, न मत्सुकृतानि प्रगणयति, न मे गृहवार्तां पृच्छति, न मत्पक्ष्यान् प्रत्यवेक्षते,न मामासन्नकार्येष्वभ्यन्तरीकरोति, न मामन्तःपुरं प्रवेशयति। अपि च, मामनर्हेषु कर्मसु नियुङ्क्ते, मदासनमन्यैरवष्टभ्यमानमनुजानाति, मद्वैरिषु विश्रम्भं दर्शयति, मदुक्तस्योत्तरं न ददाति।

**प्रश्नः - 2**. दण्डिनः पदलालित्यं वर्णयतु। (05)

**अथवा**

पुण्यवर्मणः गुणान् वर्णयतु

## खण्ड - 'ख' (नाटकम्)

**प्रश्नः 3.** अधोलिखितेषु केषाञ्चित् त्रयाणां श्लोकानां सप्रसङ्गं व्याख्या कार्या। (5x3=15)

लोकानामभयकरं गुरुं सुराणां दैत्यानां निधनकरं रथाङ्गपाणिम्।
शोकार्ता शशिवदना निशि प्रशान्ता बाहुभ्यां गिरिमिव मन्दरं वहन्ती॥

नन्दकोऽहं न मे कश्चित् सङ्ग्रामेष्वपराङ्-मुखः।
गच्छामि स्मृतमात्रेण विष्णुना प्रभविष्णुना॥

क्रोधेन नश्यति सदा मम शत्रुपक्षः सूर्यः शशी हुतवहश्च वशे स्थिता मे।
योऽहं यमस्य च यमो भयदो भयस्य तं मापवादवचनैः परिधर्षयन्ति॥

एताः प्रफुल्लकमलोत्पलवक्त्रनेत्रा गोपाङ्गनाः कनकचम्पकपुष्पगौराः।
नानाविरागवसना मधुरप्रलापाः क्रीडन्ति वन्यकुसुमाकुलकेशहस्ताः॥

गोवर्धनोद्धरणमप्रतिमप्रभावं बाहुं सुरेश! तव मन्दरतुल्यसारम्।
का शक्तिरस्ति मम दग्धुमिमं सुवीर्यं यं संश्रितास्त्रिभुवनेश्वर! सर्वलोकाः॥

तमापतन्तं सहसा समीक्ष्य सभीतगोपालकवृन्दमध्ये।
बालो बलेनाद्रिनिभं गजेन्द्रं दन्तं समाकृष्य जघान शीघ्रम्॥

**प्रश्नः 4.** बालचरितप्रथमाङ्कस्य सारं लिखत। (05)

अथवा

भासस्य नाट्यरचनाकौशलं प्रतिपादयत।

## खण्ड - 'ग' (काव्यशास्त्रम्)

**प्रश्नः 5.** अधोलिखितेषु केषाञ्चित् चतुर्णामलङ्काराणां लक्षणोदाहरणानि लिखत। (5x4=20)

अनुप्रासः, उपमा, स्वभावोक्तिः, व्यतिरेकः, दृष्टान्तः, अपह्नुतिः, विभावना।

**प्रश्नः 6.** वैदर्भीरीतिस्वरूपं सोदाहरणं निरूपयत। (05)

अथवा

रीतिस्वरूपं विशदयत।

***************